**मन्दट** पु० मन्द् टीकते टीक-ड । पारिभद्रवृक्षे शब्दरत्ना० ।

**मन्दता** स्त्री मन्दस्य भावः तल् । १आलस्ये २जाड्ये च "उच्चैरस्यति मन्दतामरसतामिति" चन्द्रालोकः ।

**मन्दर** पु० मदि-अरन् । समुद्रमन्थाने १पर्वतभेदे २मन्दारवृक्षे मेदि० ३स्वर्गे ४हारभेदे हेम० ५दर्पणे च शब्दर० । ६बहुले ७मन्दे च त्रि० मेदि० ।

**मन्दाकिनी** स्त्री मन्दमकति अक-णिनि । १स्वर्गगङ्गायां "स्वर्गे मन्दाकिनी तथा" पुराणम् । २संक्रान्तिभेदे च ।

**मन्दाक्रान्ता** स्त्री "मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ तौ गुरू चेत्" इ०र०उक्ते सप्तदशाक्षरपादके छन्दोभेदे ।

**मन्दाक्ष** न० मन्दं सङ्कुचितमक्षि यस्मात् प्रब्बमा० । १लज्जायाम् अमरः । ६ब० । २सङ्कुचितनेत्रे स्त्रियां ङीष् ।

**मन्दाग्नि** पु० मन्दः पचने अल्पशक्तिकः अग्निः अनलः, स यस्माद्वा । १देहस्थे अपचनशक्तिकेऽनले २तज्जाते रोगभेदे च । तन्निदानादि यथा "मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः । कफपित्तानिलाधिक्यात् तत्साम्याज्जाठरोऽनलः । विषमो वातजान् रोगान् तीक्ष्णः पित्तसमुद्भवान् । करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् । समा समाग्नेरशिता मात्रा सम्यग् विपच्यते । स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः" भावप्र० ।

**मन्दार** पु० मदि-आरक् । १स्वर्गस्थे देववृक्षभेदे २पारिभद्रवृक्षे च अमरः ३हस्ते ४धूर्त्ते ५तीर्थभेदे ६अर्कवृक्षे च मेदि० ।

**मन्दिर** न० मन्द्यतेऽत्र मदि-किरच् । १गृहे २पुरे च अमरः तस्य क्लीवत्वमित्येके । ३समुद्रे मेदि० ४जानुपश्चाद्भागे च पु० हेमच० । [नौकटके च (माद्गुर) मेदि० ।

**मन्दुरा** स्त्री मदि-उरच् । १अश्वशालायाम् अमरः । २शय-

**मन्दोदरी** स्त्री मयदानवकन्यायां रावणमहिष्याम् । [अमरः

**मन्दोष्ण** न० मन्दमीषदुष्णम् । १ईषदुष्णस्पर्शे २तद्वति त्रि० ।

**मन्द्र** पु० मदि-रक् । १वाद्यभेदे शब्दर० । २गम्भीरध्वनौ च । अर्श आद्यच् ३तद्वति त्रि० अमरः ।

**मन्मथ** पु० मननं मत् मन-क्विप् मथति अच् ६त० । १कन्दर्पे २कपित्थवृक्षे च अमरः ३कामचिन्तायां मेदि० ।

**मन्मथालय** पु० ६त० । १आम्रवृक्षे राजनि० २स्त्रीचिह्नभेदे च ।

**मन्या** स्त्री मेट्-मन-क्यप् । ग्रीवायाः पश्चाद्भागस्थायां शिरायाम् अमरः ।

**मन्यु** पु० मन-युच् न अनादेशः । १शोके २दैन्ये ३क्रतौ ४क्रोधे च अमरः ५अहङ्कारे च शब्दर० ।

**मन्वन्तर** न० मनूनामन्तरमवकाशस्तदुपलक्षितकालो वा । १स्वायम्भुवादिमनूनामधिकारे २तदुपलक्षिते काले च सत्ययुगमितवर्षाधिका एकसप्ततिचतुर्युगमिता (३११४४४-८०००) वर्षास्तदवकाश इति पुराणम् ।

**मभ्र** गतौ भ्वा०पर०सक०सेट् । मभ्रति अमभ्रीत् ।

**मम** अस्म०मा-वा०ङस । षष्ठ्यर्थवृत्तेः अस्मच्छब्दार्थे तेन ममत्वमिति ममतेति च सिध्यति ।

**ममता** स्त्री मम भावः तल् । १दर्पे २अहङ्कारे हेम० । ३मत्स्वत्वे च । एवं ममत्वमप्यत्र । "तथापि ममतावर्त्ते" इति "ममत्वं मम राज्यस्य" इति च देवीमा० । [विषये सि०कौ०

**ममापताल** पु० मम आलम् धातोर्वस्य मः अपतुगागमश्च ।

**मय** गतौ भ्वा०आ०सक०सेट् । मयते अमयिष्ट ।

**मय** पुंस्त्री० मय-अच् । १उष्ट्रे २अश्वतरे स्त्रियां टाप् ३दानवभेदे च मेदि० ।

**मयष्टक** पु० मि+अच् मयं प्रक्षेपं स्तकते प्रतिबध्नाति स्तक-अच् पृषो० सत्वम् । वनमुद्गे अमरः । पृषो० मपष्टक तत्रार्थे पु० ।

**मयु** पु० मि-उ । १किन्नरे अमरः २मृगे मेदि० ।

**मयुष्टक** पु० मिनोति मि-उ मयुः स्तक-अच् कर्म० पृषो० षत्वम् । वनमुद्गे पृषो० । मयुष्ठकोऽप्यत्र ।

**मयूख** पु० माङ्-ऊख मयादेशः । १त्विषि २किरणे ३शिखायाम् अमरः ४शोभायां मेदि० ५कीले अजय० ।

**मयूर** पुंस्त्री० मी-ऊरन् । स्वनामख्याते १खगभेदे स्त्रियां ङीष् । २मयूरशिखावृक्षे पु० अमरः । इवार्थे कन् ३अपामार्गे अमरः । ४तुत्थाञ्जने (तुँते) न० मेदि० ।

**मयूरग्रीवक** न० मयूरग्रीवेव कन् । तुत्थे (तुँते) राजनि० ।

**मयूरजङ्घ** पु० मयूरस्य जङ्घेव मूलमस्य । श्योनाकवृक्षे राजनि० । [राजनि०

**मयूरतुत्थ** न० मयूर इव तद्वर्णं तुत्थम् । तुत्थे (तुँते)

**मयूरविदला** स्त्री मयूरैर्विदल्यते मयूर इव विशिष्टदलमस्या वा । अम्बष्ठायाम् (आमरुल) वैद्यकम् ।

**मयूरशिखा** स्त्री मयूरस्येव शिखाऽस्याः । स्वनामख्याते क्षुपभेदे मयूरचूडादयोऽप्यत्र । "नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित्" भावप्र० ।

**मयूरिका** स्त्री मयूरस्तदाकारो विद्यतेऽस्याः तच्चन्द्रकतुल्यदलत्वात् ठन् । अम्बष्ठायाम् राजनि० (आमरुल) ।

**मरक** पु० मृ-वुन् । १दैविकभौतिकोपद्रवजन्ये प्राणिनाम् कालमरणे (मड़क) २मारिभये हेमच० ।